हरिरत्र न शक्नोति कर्तुं बाधां कुतोऽपरे ।
अन्यथा मातरो बालान्न स्तन्यैः पुपुषुः क्वचित् ॥१९॥
ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यति ।
आत्मप्रदः प्रियश्चापि किमर्थं मोहयिष्यति ॥२०॥
तस्मादुक्तप्रकारेण परित्यागो विधीयताम् ।
अन्यथा भ्रश्यते स्वार्थादिति मे निश्चिता मतिः ॥२१॥
इति कृष्णप्रसादेन वल्लभेन विनिश्चितम् ।
संन्यासवरणं भक्तावन्यथा पतितो भवेत् ॥२२॥

इति श्रीवल्लभाचार्यविरचितः संन्यासनिर्णयः समाप्तः ।

## अथ निरोधलक्षणम् ।

श्रीकृष्णाय नमः ।

यच्च दुःखं यशोदाया नंदादीनां च गोकुले ।
गोपिकानां च यद् दुःखं तद् दुःखं स्यान्मम क्वचित् १
गोकुले गोपिकानां च सर्वेषां व्रजवासिनाम् ।
यत्सुखं समभूत्तन्मे भगवान्किं विधास्यति ॥२॥
उद्धावागमने जात उत्सवः सुमहान्यथा ।
वृंदावने गोकुले वा तथा मे मनसि क्वचित् ॥३॥
महतां कृपया यावद्भगवान् दययिष्यति ।
तावदानंदसंदोहः कीर्त्यमानः सुखाय हि ॥४॥

महतां कृपया यद्वत्कीर्तनं सुखदं सदा ।
न तथा लौकिकानां तु स्निग्धभोजनरूक्षवत् ॥५॥
गुणगाने सुखावाप्तिर्गोविंदस्य प्रजायते ।
यथा तथा शुकादीनां नैवात्मनि कुतोऽन्यतः ॥६॥
क्लिश्यमानाञ्जनान् दृष्ट्वा कृपायुक्तो यदा भवेत् ।
तदा सर्वं सदानंदं हृदिस्थं निर्गतं बहिः ॥७॥
सर्वानंदमयस्यापि कृपानंदः सुदुर्लभः ।
हृद्गतः स्वगुणाञ्श्रुत्वा पूर्णः प्लावयते जनान् ॥८॥
तस्मात्सर्वं परित्यज्य निरुद्धैः सर्वदा गुणाः ।
सदानंदपरैर्गेयाः सच्चिदानंदता ततः ॥९॥
अहं निरुद्धो रोधेन निरोधपदवीं गतः ।
निरुद्धानां तु रोधाय निरोधं वर्णयामि ते ॥१०॥
हरिणा ये विनिर्मुक्तास्ते मग्ना भवसागरे ।
ये निरुद्धास्त एवात्र मोदमायान्त्यहर्निशम् ॥११॥
संसारावेशदुष्टानामिंद्रियाणां हिताय वै ।
कृष्णस्य सर्ववस्तूनि भूम्न ईशस्य योजयेत् ॥१२॥
गुणेष्वाविष्टचित्तानां सर्वदा मुर वैरिणः ।
संसारविरहक्लेशौ न स्यातां हरिवत्सुखम् ॥१३॥
तदा भवेद्दयालुत्वमन्यथा क्रूरता मता ।
बाधशंकापि नास्त्यत्र तदध्यासोऽपि सिध्यति ॥१४॥

१ स्वतः.

भगवद्धर्मसामर्थ्याद्विरागो विषये स्थिरः ।
गुणैर्हरेः सुखस्पर्शान्न दुःखं भाति कर्हिचित् ॥१५॥
एवं ज्ञात्वा ज्ञानमार्गदुत्कर्षो गुणवर्णने ।
अमत्सरैरलुब्धैश्च वर्णनीयाः सदा गुणाः ॥१६॥
हरिमूर्तिः सदा ध्येया संकल्पादपि तत्र हि ।
दर्शनं स्पर्शनं स्पष्टं तथाकृतिगती सदा ॥१७॥
श्रवणं कीर्तनं स्पष्टं पुत्रे कृष्णप्रिये रतिः ।
पायोर्मलांशत्यागेन शेषभागं तनौ नयेत् ॥१८॥
यस्य वा भगवत्कार्यं यदा स्पष्टं न दृश्यते ।
तदा विनिग्रहस्तस्य कर्तव्य इति निश्चयः ॥१९॥
नातः परतरो मंत्रो नातः परतरः स्तवः ।
नातः परतरा विद्या तीर्थं नातः परात्परम् ॥२०॥

इति श्रीवल्लभाचार्यविरचितं निरोधलक्षणं समाप्तम् ।

# अथ सेवाफलम् ।

श्रीकृष्णाय नमः ।

यादृशी सेवना प्रोक्ता तत्सिद्धौ फलमुच्यते ।
अलौकिकस्य दाने हि चाद्यः सिध्येन्मनोरथः ॥१॥
फलं वा ह्यधिकारो वा न कालोऽत्र नियामकः ।
उद्वेगः प्रतिबंधो वा भोगो वा स्यात्तु बाधकम् ॥२॥

१ दुत्कर्षं हरिवर्णने. २ स्वेष्टं. ३ पायुं. ४ भावं. ५ तनुं.